प्रयुक्तत्वञ्च कारणाभावात् कार्य्याभाव इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः तत्प्रतियोगिजन्यताद्दशप्रतियोगिकत्वं तत्प्रयुक्तत्वम् । भवति चाव्यवहितपूर्ब्ववर्त्तिताख्यसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकप्रयुक्तो घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति । घटपदस्यानुस्वारपदवत्त्वं तादृशान्वयबोधस्याकाङ्क्षा । एवं विनिगमनाविरहेणाव्यवहितोत्तरवर्त्तिताख्यसमभिव्याहारसम्बन्धेनानुस्वारपदनिष्ठस्य घटपदव्यतिरेकप्रयुक्तोऽपि घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति तादृशशाब्दबोधेऽनुस्वारपदस्य घटपदवत्त्वमपि आकाङ्क्षा । अव्यवहितपूर्ब्ववर्त्तिताख्यसमभिव्याहारसम्बन्धेन घटपदस्य कर्मत्वपदवत्त्वम्, अव्यवहितोत्तरवर्त्तिताख्यसमभिव्याहारसम्बन्धेन कर्मत्वपदस्य घटपदवत्त्वञ्च न घटवत् कर्मत्वमिति भेदान्वयबोधे आकाङ्क्षा-अव्यवहितपूर्ववर्त्तिताख्यसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्य कर्मत्वपदस्याव्यवहितोत्तरवर्त्तिताख्यसमभिव्याहारसम्बन्धेन कर्मत्वपदनिष्ठस्य घटपदस्य च व्यतिरेकयोर्घटवत् कर्मत्वमिति भेदान्वयबुद्ध्यभावाप्रयोजकत्वात् । कारणाभावस्यैव कार्य्याभावप्रयोजकत्वात् अव्यवहितपूर्ब्ववर्त्तितासम्बन्धेन घटपदनिष्ठस्य कर्मत्वपदस्याव्यवहितोत्तरवर्त्तितासम्बन्धेन कर्मत्वपदनिष्ठस्य घटपदस्य भेदान्वयबुद्धावहेतुत्वात्" ।

'वेदान्तपरिभाषायान्तु अन्यथोक्तं यथा तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्त्तव्यतायाश्च जिज्ञासाविषयत्वात् । अजिज्ञासोरपि वाक्यार्थबोधात् योग्यत्वमुपात्तं तदवच्छेदकञ्च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः । अभेदान्वये च समानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकमिति तत्त्वमस्यादिवाक्येषु नाव्याप्तिः । एतादृशाभिप्रायेणैव बलाबलाधिकरणे "सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मित्यत्र वैश्वदेवयागस्यामिक्षान्वितत्वेन न वाजिनाकाङ्क्षेत्यादिव्यवहारः । ननु तत्रापि वाजिनस्य जिज्ञासाविषयत्वेऽपि तद्योग्यत्वमस्त्येव, प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वात् इति चेन्न स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात् । आमिक्षायान्तु नैवं, वाजिनान्वयस्य तदानुपस्थानात् । उदाहरणान्तरेष्वपि दुर्बलत्वप्रयोजकाकाङ्क्षाविरह एवमेव द्रष्टव्यः" । "आकाङ्क्षेयं तत्गुरुतया नैव गन्तुं समर्थेति" पदाङ्कदूतम् "साकाङ्क्षशब्दैर्यो बोधः पदार्थान्वयगोचरः" इति "योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका" इति शब्दशक्ति० "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा० द० "आकाङ्क्षाप्रतीतिपर्य्यवसानविरहः स च जिज्ञासारूपः" सा० द० ।

**आकाङ्क्षित** त्रि० आ+काङ्क्ष–कर्म्मणि क्त । इच्छाविषये ।

**आकाङ्क्षिन्** त्रि० आकाङ्क्षति आ+काङ्क्ष–णिनि । इच्छावति "अफलाकाङ्क्षिभिर्यज्ञोविधिदृष्टोय इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्विकः" गीता । स्त्रियां ङीप् । "तं भावार्थप्रसवसमयाकाङ्क्षिणीनां प्रजानाम्" रघुः ।

**आकाय** पु० आ+चि-कर्म्मणि घञ् चितौ कुत्वम् । १चीयमानेऽग्नौ "आकायमग्निं चिन्वीत" सि०कौ०उ० २निवासे इति केचित् तत्र कुत्वं चिन्त्यमलम् ।

**आकार** पु० आ+कृ–घञ् । १ मूर्त्तौ, २अवयवसंस्थानविशेषे च । आक्रियते आविष्क्रियते हृद्गतोभावोऽनेन आ–कृ–करणे घञ् । ३हृद्गतभावावेदके मुखप्रसादवैवर्ण्यरूपे प्रीत्यप्रीतिसूचके देहचेष्टने । भावे घञ् । ४हृद्गतभावावेदने, ५इङ्गिते च । "आकारम्बाद्यमानोऽपि न शक्योविनिगूहितुम् । बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम्" "आकारसदृशप्रज्ञः" रघुः । "तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च" रघुः । इङ्गितं हृद्गतोभावो बहिराकार आकृतिः" । सज्जनः । ६तादात्म्ये ७अभेदोपगमे च । आकरस्य सांख्यादिमतसिद्धः अभेदस्थानीयः पदार्थभेदः विषयिताविशेषो वा । "यत् संबद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्षमिति" सां० सू० । "सम्बद्धं भवत् सम्बद्धवस्त्वाकारधारि भवति यद्विज्ञानं बुद्धिवृत्तिस्तत् प्रत्यक्षम् स्वार्थसन्निकर्षजन्याकाराश्रयो वृत्तिः प्रत्यक्षमिति फलितम् । "वृत्तिः संबन्धार्थं सर्पती"त्यागामिसूत्रात् वृत्तेर्न सन्निकर्षजन्यत्वमित्याकाराश्रयग्रहणम् चक्षुरादिद्वारकबुद्धिवृत्तिश्च प्रदीपस्य शिखातुल्या बाह्यार्थसन्निकर्षानन्तरमेव तदाकारोल्लेखिनी भवतीति नासम्भवः" भा० । वेदान्तिभिरपि अन्तःकरणस्य सावयवत्वस्वीकारेण बुद्धिवृत्तेस्तदाकारत्वमुररीकृतं यथोक्तं वेदा० परिभा० । "यथा तड़ागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्ति-